UGC Approved Journal No. 49321 Impact Factor : 2.591 ISSN : 0976-6650

# Shodh Drishti

An International Peer Reviewed Refereed Research Journal

Vol. 10, No. 6 Year - 10 June, 2019

PEER REVIEWED JOURNAL

UGC Approved Journal No. 49321 Impact Factor : 2.591 ISSN : 0976-6650

# Shodh Drishti

**An International Peer Reviewed Refereed Research Journal**

Vol. 10, No. 6 Year - 10 June, 2019

PEER REVIEWED JOURNAL

*Editor in Chief*
**Prof. Abhijeet Singh**

*Editor*
**Prof. Vashistha Anoop**
**Department of Hindi**
**Banaras Hindu University**
**Varanasi**

**Dr. K.V. Ramana Murthy**
**Associate Professor of Commerce**
**and Vice Principal**
**Vijayanagar College of Commerce**
**Hyderabad**

*Published by*
**SRIJAN SAMITI PUBLICATION**
**VARANASI**
**Mob.** 9415388337, **E-mail :** shodhdrishtivns@gmail.com, **website :** shodhdrishtijournal1.com

Impact Factor : 2.591
ISSN : 0976-6650

# विषयानुक्रमणिका


| | | पृष्ठ संख्या |
|---|---|---|
| ☛ | संचार मानव के स्वभाव का अभिन्न अंग<br>प्रो. (डॉ.) अमर ज्योति सिंह, प्रो. (डॉ.) अमर बहादुर सिंह एवं डॉ. अमरनाथ सिंह | 1-2 |
| ☛ | शरद जोशी का व्यंग्य और उनकी सामाजिक चेतना<br>कमलेश कुमार यादव | 3-5 |
| ☛ | स्वतन्त्रता की अवधारणा : भारतीय सन्दर्भ में<br>डॉ0 प्रेमलता त्रिपाठी | 6-8 |
| ☛ | प्राथमिक विद्यालय में कार्यरत् शिक्षको में दायित्व बोध : एक अध्ययन<br>अंकिता मिश्रा | 9-10 |
| ☛ | जनपद आजमगढ़ (उ0प्र0) में भूमि उपयोग : एक भौगोलिक अध्ययन<br>डॉ0 जगदेव एवं डडेश कुमार | 11-14 |
| ☛ | प्रेमचन्द की औपन्यासिक दृष्टि : एक अनुशीलन<br>डॉ0 पुष्पलता कुमारी | 15-18 |
| ☛ | औरंगजेब-कालीन मुगल स्थापत्य कला<br>प्रमोद कुमार शर्मा | 19-22 |
| ☛ | Use of Educational Technology in Music Teaching : An Analysis<br>**Dr. Akanksha Sharma** | 23-26 |
| ☛ | L'amour de la nature chez Wordsworth<br>**Dr. S.P. Singh & Aradhana Singh** | 27-31 |
| ☛ | A Review on *Saviryta Avadhi* w.s.r. to Shelf Life of Ayurvedic Formulations<br>**Dr. Pritika Devi & Dr. Keshav Rana** | 32-34 |
| ☛ | भारतीय लोक संगीत – हिन्दी फिल्मी संगीत में इसका योगदान<br>गंगाधर मिर्धा | 35-38 |
| ☛ | भारतीय दलित आन्दोलन के इतिहास में अम्बेडकरवाद, गाँधीवाद और मार्क्सवाद<br>डॉ0 अरूण कुमार गुप्ता एवं मनोज कुमार | 39-46 |
| ☛ | Globalization: Its Impact on Non-Aligned Countries<br>**Prahlad Bordoloi** | 47-52 |
| ☛ | South Asian Association for Regional Cooperation: An Introduction<br>**Khem Chand** | 53-57 |
| ☛ | China Bangladesh Rising Strategic Relations: Security implication for India<br>**Pushpendra Gautam** | 58-60 |
| ☛ | Human Resource Management in India<br>**Rajesh Kumar, Dr. Rashikesh & Dr. Murad Ali** | 61-66 |
| ☛ | Inhibitory Effects of Weeds on Germination and Growth of *Vigna radiata* (L) Wildzek<br>**Dr. Awanish Kumar Singh** | 67-71 |

| | | |
|---|---|---|
| ☛ | Interrogating Colonial Cultures of the Trinidad and four adjacent Caribbean Countries in *The Middle Passage*<br>**Dr. Ragini Yadav** | 72-76 |
| ☛ | लोकसभा चुनाव 2019 में सोशल मीडिया की भूमिका<br>विमल कुमार सिंह | 77-78 |
| ☛ | Hanumana in the Art of Chattisgarh<br>**Ratna Sengupta** | 79-81 |
| ☛ | Yoga in Psychology and Psychotherapy<br>**Dr. Priyankar Agrawal** | 82-84 |
| ☛ | मनोहर श्याम जोशी के उपन्यासों मे धार्मिक एवं नैतिक जीवन के विविध आयाम<br>उमेश कुमार यादव | 85-88 |
| ☛ | मनुस्मृति में भारतीय राजधर्म की अवधारणा का एक अध्ययन<br>अभिषेक कुमार सिंह एवं डॉ0 सुरेन्द्र सिंह | 89-92 |
| ☛ | समकालीन दलित कविता में यथार्थबोध<br>सूरज कुमार गोस्वामी एवं प्रो० विष्णु कुमार अग्रवाल | 93-97 |
| ☛ | धार्मिक सहिष्णुता की अभिवृद्धि में सम्राट अशोक का योगदान<br>डॉ0 मार्तण्ड प्रताप सिंह | 98-100 |
| ☛ | A Comparative Clinical Study of *Madhusiktadi Lepa* and *Padabhyanga* in Management of *Padadari*<br>**Dr. Harmandeep Kaur Brar** | 101-108 |
| ☛ | Sublime Beauty to Repulsive Disgust: Grotesque Narration of Women in Contemporary Indian Art Practice, with Special Reference to the Installation Art<br>**Shweta Kevale Naik** | 109-114 |
| ☛ | A Review on *Saviryta Avadhi* w.s.r. to Shelf Life of Ayurvedic Formulations<br>**Dr. Pritika Devi & Dr. Keshav Rana** | 115-117 |
| ☛ | Indian Banking – Clean Up Balance Sheets<br>**Dr. Rajmani Ram Patel** | 118-122 |
| ☛ | भारतीय साहित्यिक ग्रन्थों में मृण्मय पात्रों का उल्लेख<br>डॉ0 ब्रह्म स्वरुप | 123-125 |
| ☛ | दादू पंथ के उप सम्प्रदाय<br>चिरंजी लाल बागड़ी | 126-128 |
| ☛ | महिलाओं एवं ग्रामीण बच्चों के स्वास्थ्य का विश्लेषणत्मक अध्ययन (बिहार के विशेष संदर्भ में)<br>संजीता रानी | 129-133 |
| ☛ | महिला सशक्तिकरण हेतु आरक्षण का प्रावधान और उसका प्रभाव<br>डॉ0 मीरा सिंह | 134-136 |
| ☛ | अलाउद्दीन खिलजी की आर्थिक नीति और बाजार नियंत्रण : पुनरावलोकन<br>डॉ० मनोज सिंह बाफिला एवं गरिमा पाण्डेय | 137-140 |
| ☛ | Einstein's Equations Analogous to the TdS – dE = PdV Equation<br>**Dr. Chandra Sen Yadav** | 141-142 |

| | | |
|---|---|---|
| ☛ | Online Learning in Higher Education A Qualitative Case Study on Unacademy- India's Largest Learning Platform<br>**Shifali Singh** | 143-150 |
| ☛ | Theoretical Study of Size Dependence Cohesive Energy of Nanoparticles<br>**Mahipal Singh, Vikash Dubey & Moh Abdul Aleem Ansari** | 151-155 |
| ☛ | Insurance as a Social Welfare Tool<br>**Mohd Ossama** | 156 |
| ☛ | प्राथमिक शिक्षकों के मूल्यों एवं कार्यसंतुष्टि के मध्य संबंध का अध्ययन करना<br>**मनीष कुमार मिश्र एवं प्रो0 आर0पी0 शुक्ल** | 157-160 |
| ☛ | Neo-Liberalism and Universal Education<br>**Anju Rawat** | 161-165 |
| ☛ | Foreign Employment and its Socio-Economic Impacts<br>**Lila Ballabh Dhakal** | 166-170 |
| ☛ | Traditional Folk Media: An Effective Communication Tool for Rural Development and Awareness<br>**Moumita Chakraborty & G.P. Pandey** | 171-177 |
| ☛ | संगीत गायन की विधाएं<br>**डॉ0 ऋचा चतुर्वेदी** | 178-184 |
| ☛ | भारतीय समाज में असंगठित क्षेत्र की महिला श्रमिकों के लिए सामाजिक सुरक्षा के मार्ग में समस्याओं एवं समाधान<br>**सुनीता कुमारी** | 185-188 |
| ☛ | मुगलकाल में ऊनी वस्त्र का विकास : एक सर्वेक्षण<br>**विनय कुमार पटेल** | 189-191 |
| ☛ | शिक्षा में परामर्श की उपादेयता : एक अध्ययन<br>**डॉ0 समित कुमार सिन्हा** | 192-194 |
| ☛ | भारतीय समाज में महिलाओं की स्थिति : एक दशा (वैदिक काल से आधुनिक काल तक)<br>**अनिल कुमार राम** | 195-198 |
| ☛ | उत्तर प्रदेश के सरयूपार तराई क्षेत्र में जनसंख्या गत्यात्मकता का समन्वित स्वरूप<br>**प्रभात कुमार तिवारी** | 199-202 |
| ☛ | काव्य में लोक संवेदना "हरिवंश राय बच्चन"<br>**सौरम कुमार श्रीवास्तव** | 203-207 |
| ☛ | पं0 दीनदयाल उपाध्याय : एकात्म मानववाद की सम्यक अवधारणा<br>**ज्योति पाण्डेय** | 208-210 |
| ☛ | वैदिक साहित्य में पर्यावरण<br>**डॉ0 किरण सिंह** | 211-214 |
| ☛ | वेदांगव्याकरणदिशा शोधप्रारूपम् एवं प्रयोगविज्ञानम्<br>**डॉ0 दिव्यचेतनब्रह्मचारी** | 215-216 |
| ☛ | स्मृतियों पर आधारित संस्कारों की वैज्ञानिक उपादेयता : एक अध्ययन<br>**डॉ0 रुपम सिन्हा** | 217-218 |

UGC Approved Journal No. 49321
Shodh Drishti (An International Peer Reviewed Refereed Research Journal), Vol. 10, No. 6, June, 2019

Impact Factor : 2.591
ISSN : 0976-6650

# वेदांगव्याकरणदिशा शोधप्रारूपम् एवं प्रयोगविज्ञानम्

डॉ0 दिव्यचेतनब्रह्मचारी
अतिथिप्राध्यापकः वैदिकदर्शनविभागः, काशीहिंदूविश्वविद्यालयः, वाराणसी

व्याकरणशास्त्रमिदं समेषां शोधप्रारूपाणां प्रयोगविज्ञानानां प्रविधिविशेषाणां च सर्वोत्तमतया राजमानं दृश्यते। अत एवोक्तं महाभाष्ये 'सर्वशात्रपारिषदमिदं व्याकरणं पाणिनीयम्। व्याकरणे शोधप्रक्रियातः एव प्रकरणानां प्रारम्भः भवति यथाधुनिककालेऽपि कस्मादपि कार्यात् प्राक् किमपि भूमिकारूपेण तत्र कार्यक्रमस्य परिचयो दातव्यः भवति। तस्मिन् पूर्वं नाम भवति। ततः दोषादोषाणां विचारो भवति ततः दोषनिवृत्तये उपायाः कल्पिताः भवन्ति, एवं कालावधिः निर्धारितो भवति। तथैव व्याकरणशास्त्रेऽपि वैज्ञानिकोऽयमेव क्रमः आश्रितो वर्तते तथा च संज्ञासूत्राणां रचना ततः परिभाषासूत्राणां ततः विधिनिषेधात्मकानां शास्त्राणां रचनाक्रमो दृश्यते। उदाहरणरूपेण– प्रथमं सूत्रं वर्तते 'वृद्धिरादैच्'[1] ततः 'अदेङ्गुणः'[2] ततः इको गुणवृद्धी[3] ततः 'क्ङिति चेति।'[4] वैज्ञानिकोऽयमेव क्रमः आश्रितः क्रमः शोधकार्येऽपि दृश्यते। आदौ विषयाणामुल्लेखः भवति पश्चात् तद्विषयमादाय पर्यालोचना ततः परिष्कृतं ग्राह्यं भवति दूषितं त्याज्यं भवति। तथैव व्याकरणेऽपि वैज्ञानिकः क्रमः स्वीकृतः, यथा एको वैज्ञानिकः कालभेदेन केषांचित् पदार्थानां विवेचनं पृथक्–पृथक् करोति। केषांचित् पदार्थानां सर्वस्मिन् समानरूपेण प्रक्रिया बोधिता भवति। एवं व्याकरणेऽपि प्रयोगभेदेन शोधप्रारूपे भेदो भवति। यथा 'सुधी + उपास्यः' इत्यत्र तु नित्यमेव सन्धिरूपात्मकं कार्यं भवति तस्मिन् विकल्पावसरः नास्ति तस्मिन् एकः नियमो वर्तते।

**संहितैकपदे नित्या नित्या धातूपसर्गयोः।**
**नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।**[5]

एतस्यायं भाव एकस्मिन् पक्षे संहिता = सन्धिः वर्णानां मेलनादिकार्यं नित्यं सर्वस्मिन् काले कर्तव्यम्। तथा च धातूपसर्गयोश्च नित्या संहिता भवति यथा अधीते इत्यस्मिन अधि = इत्युपसर्गः ईङ् अध्ययने धातुः तयोर्मध्ये नित्या दीर्घरूपा संहिता भवति। तथैव एकपदेऽपि यथा हरये = इति सुबन्तं पदं वर्तते तस्मिन् हरि इति प्रतिपादिकम, ए इति प्रत्ययः हरि इत्यस्येकारस्य 'घेर्ङिति'[6] सूत्रेण गुणे हरे ए भवति ततः एचोऽयवायावः[7] इति नित्यमेव अयादेशसन्धिं विधत्ते तथा च रूपं भवति हरये। एवं सुद्ध्युपास्यः इत्यस्मिन् समासेऽपि नित्या संहिता भवति तथा हि सुधीभिः उपास्यः इति तृतीया तत्पुरुषसमासः समासत्वात् कृत्तद्धितसमासाश्च[8] इत्यनेन प्रातिपादिकसंज्ञा ततः "सुपो धातुप्रातिपदिकयोः"[9] इति सुब्लोपः सुधी उपास्य इति जायते। अस्मिन् समासः वर्ततेऽतः नित्य एवास्मिन् सन्धिः भवति स यण्रूपः तथा च भवति शोधितं रूपं सुद्ध्युपास्यः। परन्तु वाक्ये संहिता वक्तुरिच्छया जायते यथा दधि अस्ति इदं वाक्यं वर्तते तस्मिन् इको यणचि सुत्रं प्रयोक्तुः कामना स्यात् तर्हि यण्सन्धिः भवति।

अत्र व्याकरणशास्त्रं कथं वैज्ञानिकं प्रयोगं शोधयति, एको मूलतो दृष्टान्त उपस्थाप्यते। कारकशब्दस्य वैज्ञानिकं रूपं प्रस्तूयते (1) डुकृञ् मूल– धातुः ततः 'आदिर्ञिटुडवः'[10] सूत्रेण डु इत्यस्य तथा च हलन्त्यम् शास्त्रेण इत्संज्ञा भवति। तस्य लोपः इत्यनेन डु–ञ् अनयोः लोपं विधाय कृ रूपं शोधितम्। इदमपि न योगार्हम्। पुनः तत्र प्रत्ययं कल्पयति 'ण्वुल्तृचौ'[11] इत्यतः ण्वुल्प्रत्ययः आयाति। पुनश्च ण इत्यस्य ल् इत्यस्य लोपार्थं नियमद्वयं कल्पयति इत्संज्ञाविधायकं 'चुटू'[12] हलन्त्यम्[13] ततश्च पुनः तस्य लोपः[14] शास्त्रं लोपं विधत्ते। तथा च भवति स्थितिः कृ वु इति ततः पुनः शोधयति 'युवोरनाकौ'[15] इति सूत्रेण वु इत्यस्य अक विधीयते तथा च (अचो ञ्णिति)[16] वृद्धिं करोति, ततः कार् अक भवति पुनः मेलनेन कारक इति भवति ततश्च विज्ञापयति 'कृत्तद्धितसमासाश्च'[17] इति 'प्रतिपादिकसंज्ञां' ततः स्वौजस्[18] इत्यादिसूत्रेण द्वयेकयोर्द्विवचनैकवचने प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा[19] इति सूत्रनियमेन कारकशब्दात् सुप्रत्ययो भवति। ततः कारक सु भवति ततः 'उपदेशेऽजनुनासिक इत्'[20] सोः उकारस्य इत्संज्ञा तस्य लोपः इति सूत्रेण उकारस्य लोपे कारकस् भवति ततः ससजुषोरुः[21] इत्यनेन स् इत्यस्य रुः भवति पुनः रु इत्यस्योकारस्येत् संज्ञा लोपो भवति कारकर् इति भवति ततः स्थानिवत्वेन सुप्त्वं वर्तते। 'सुप्तिङन्तं पदम्'[22] पदं करोति ततः 'खरवसानयो– विसर्जनीयः'[23] इति विसर्गो भवति। कारकशब्दः लोके प्रयोगार्हो भवति। कारकः इति शोधनाय कियान् वैज्ञानिकः प्रयत्नः पाणिनिना कृतः वर्तते। अन्यत्र एवं नोपलभ्यते वैज्ञानिकता।

एवं समेषां प्रयोगाणां शोधविधिः शोधप्रारूपं वर्तते यथात्र भाषाविषये वैज्ञानिकशोधप्रक्रिया दृश्यते तथा अन्यत्र भाषासु न दृश्यते।

Impact Factor : 2.591
ISSN : 0976-6650

**वेदांगव्याकरणशास्त्रे** प्रयोगविधिः द्विविधः वर्तते संक्षेपतः विस्तारं प्रति अपरः विस्तारतः संक्षेपतां प्रति।

पदाद् वाक्यं प्रति यः प्रयोगविधिः भवति स संक्षेपतः विस्तारं प्रति गच्छति। यथा समस्तं पदं मध्वरिः एतस्य वाक्येन विस्तारभूतं भवति मधो; अरिः पूर्वस्मिन् मध्वरिः इत्यत्र सार्धपंचमात्रात्मकः वर्णसमुदायः आसीत् विस्तारभूते वाक्ये (मधोः अरिः) तु इत्यत्र सार्धसप्तमात्रात्मकः समुदायः वर्तते। एवं प्रकृतिप्रत्यये वर्णस्फोटत्वं तिष्ठति तदा असमस्तादपि पदात् प्रक्रियायां विस्तारो दृश्यते यथा 'रामाः' इत्यस्य प्रक्रियादशायां स्थितिः भवति राम अस् एतस्य प्रयोगः केवलं शास्त्रप्रक्रियानिर्वाहाय भवति। तत्र रामाः संक्षेपतः राम अस् इति विस्तारो जायते।

अपरः– विस्तारात् संक्षेपं प्रति वाक्यं गच्छति सः विधिः संक्षेपकविधिः उच्यते।

**पुत्रीयति–** यथा पुत्रमात्मानमिच्छति पुत्रीयति, पठितुमिच्छति पिपठिषति, पुनः–पुनः अतिशयेन वा भवति बोभूयते एतेषां मध्ये एकस्य विवरणं प्रस्तूयते दृष्टान्तमुद्रया (1) पुत्रमात्मानमिच्छति इत्यत्र वाक्ये त्रीणि पदानि सन्ति। (1) पुत्रम् (2) आत्मानम् (3) इच्छति व्याकरणदृष्ट्या। तार्किकदृष्ट्या तु षट् पदानि तार्किकाणां मते शक्तं पदं भवति इति रीत्या। तथादौ (1) पुत्र (2) अम् (3) आत्मन् (4) अम् (5) इच्छ (6) तिप् परन्तु (सुप आत्मनः क्यच्) इति सूत्रेण उक्त विग्रहे (पुत्रमात्मानमिच्छति) क्यच् प्रत्यये ततः पुत्र–अम् क्यच् ततः 'सनाद्यन्ताः धातवः'[24] इति धातुसंज्ञा ततः 'सुपो धातुप्रातिपदिकयोः'[25] सुप्लुकि पुत्र क्यच्, चुटू तथा च हलन्त्यम्[26] इति कचयोः इत्संज्ञा ततः तस्य लोपः[27] इत्यनेन लोपे ततः पुत्रीय वर्तमाने लट् इत्यनेन पुत्रीय लट् इति स्थितौ तिप्तस्..........।[28] तिङस्त्रीणित्रीणिप्रथममध्यमोत्तमाः[29]– तान्येकवचन[30] शेषात्कर्तरि परस्मैपदम्[31] इत्यादि सूत्रसहायेन लटः स्थाने तिप् कर्तरि, कर्तरि शप्[32] इति ततः अनुबन्धलोपे पुत्रीयति इति जायते पूर्वस्थितिः पुत्रमात्मानमिच्छति आसीत् संप्रति पुत्रीयति प्रयोगो निष्पन्नः उभयोः अर्थस्तु एक एव। अत्र पुत्रमात्मानमिच्छति इत्यतः विस्तारात् संक्षेपः पुत्रीयति भवति इति प्रयोगविज्ञानविधिः। अत्र व्याकरणदृष्ट्या एकमेव तिङन्तम् पदम्, तार्किकदिशा त्रीणि पदानि (1) पुत्र (2) य (3) ति। षड्भ्यः पदेभ्यः संक्षेपः।

**पिपठिषति–** पठितुमिच्छति इत्यत्रापि (1) पुठितुम् (2) इच्छति तस्य संक्षेपः पिपठिषति एकं तिङन्तं पदम्। तार्किकमते चत्वारि पदानि (1) पठ् (2) इतुम् (3) इच्छति तद् दृष्ट्या संक्षेपः पिपठिषति इत्यत्र त्रीणि पदानि। तथा हि पिपठषति इति संक्षेपः वर्तते।

**बोभूयते–** पुनः पुनः अतिशयेन भूयते बोभूयते इत्यत्रापि विस्तारात् संक्षेपः वर्तते। तत्र हि पुनः पुनः अतिशयेन भूयते त्रयाणां पदानां प्रयोगार्थं बोभूयते एकमेव पदं प्रयोज्यतेऽर्थस्तु तदेवात्रापि महान् संक्षेपः। दृष्टान्तरूपेण द्वित्राः प्रयोगाः उद्धृताः। वेदांगपाणिनीयव्याकरणे महान् वैज्ञानिको विचारोऽस्मिन् विषये उपलभ्यते। जिज्ञासुभिः ततः एव बोद्धव्यम् इति शम्।

## संदर्भसूची

1. अष्टाध्यायी, 1/1/1
2. अष्टाध्यायी, 1/1/2
3. अष्टाध्यायी, 1/1/3
4. अष्टाध्यायी, 1/1/5
5. सिद्धान्तकौमुद्याः लक्ष्मीटीकायामुद्धृतम्
6. अष्टाध्यायी, 7/3/111
7. अष्टाध्यायी, 6/1/78
8. अष्टाध्यायी, 1/2/46
9. अष्टाध्यायी, 2/4/71
10. अष्टाध्यायी, 1/3/5
11. अष्टाध्यायी, 3/1/133
12. अष्टाध्यायी, 1/3/7
13. अष्टाध्यायी, 1/3/3
14. अष्टाध्यायी, 1/3/9
15. अष्टाध्यायी, 7/1/1
16. अष्टाध्यायी, 7/2/115
17. अष्टाध्यायी, 1/2/46
18. अष्टाध्यायी, 4/1/2
19. अष्टाध्यायी, 1/4/22
20. अष्टाध्यायी, 1/3/2
21. अष्टाध्यायी, 8/2/66
22. अष्टाध्यायी, 1/4/14
23. अष्टाध्यायी, 8/3/15
24. अष्टाध्यायी, 3/1/32
25. अष्टाध्यायी, 2/4/71
26. अष्टाध्यायी, 1/3/3
27. अष्टाध्यायी, 3/1/9
28. अष्टाध्यायी, 3/4/78
29. अष्टाध्यायी, 1/4/101
30. अष्टाध्यायी, 1/4/102
31. अष्टाध्यायी, 1/3/78
32. अष्टाध्यायी, 3/1/68





Banaras Hindu University, Varanasi

Shodh Drishti

(An International Peer Reviewed Refereed Research Journal)

H.No. 498, Kakarmatta (South), Near-D.L.W. Barak)
P.O.-D.L.W., Distt.-Varanasi-221004 (U.P.), India
Mob. No. : 9415388337
Website : shodhdrishtijournal1.com
shodhdrishtijournal.com
E-mail : shodhdrishtivns@gmail.com
shodhdrishti@rediffmail.com

सप्तचत्वारिंशम्

ISSN 2231-6221

# परिशीलनम्

उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिकी शोधपत्रिका



## उत्तरप्रदेश-संस्कृत-संस्थानम्

(उत्तरप्रदेश-शासनाधीनम्)

संस्कृत-भवनम्, नया हैदराबाद, लखनऊ

ISSN 2231-6221

सप्तचत्वारिंशम्

# परिशीलनम्

## उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिकी शोधपत्रिका

जुलाई 2023

संवत् 2080

सम्पादकः

**प्रो. भारतभूषण त्रिपाठी**

व्याकरण विद्या शाखा

केन्द्रीय संस्कृत विश्वविद्यालयः

लखनऊ परिसरः

**उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ-7**

प्रकाशकः
**विनयश्रीवास्तवः**
निदेशकः
उत्तरप्रदेश संस्कृत-संस्थानम्
Email- ramkishore.pandey85@gmail.com

प्रथमं संस्करणम् - जुलाई 2023

**ISSN 2231-6221**

एकम् प्रतिः : 50 रूप्यकाणि
वार्षिकमूल्यम् : 100 रूप्यकाणि

प्राप्तिस्थानम्
**विक्रय-विभागः**
उत्तरप्रदेश संस्कृत-संस्थानम्
संस्कृत-भवनम्, नया हैदराबाद, लखनऊ-7
फोन- 0522-2780251
Email- upsanskritsansthanam@yahoo.com
वेवसाइट-www.upsanskritsansthanam.org

मुद्रक : **शिवम् आर्ट्स**, 569-570, दूसरी गली, निशातगंज, लखनऊ-226 007
मो. 9415061690 e-mail : shivamarts.lko@gmail.com

# विषयानुक्रमणिका


| | | | |
|---|---|---|---|
| | अध्यक्षीयम् | | iii |
| | निदेशकीयम् | | iv |
| | सम्पादकीयम् | | v |
| 1. | संस्थानगीतिका | - डॉ. अरविन्दकुमारतिवारी | 1 |
| 2. | भारतीयदर्शनानां प्रासङ्गिकता | - प्रो. विजयकुमारजैनः | 2–6 |
| 3. | वाल्मीकिरामायणे शिक्षातत्त्वानि | - प्रो. लोकमान्यमिश्रः | 7–16 |
| 4. | टैगोरमहोदयस्य शिक्षादर्शनम् (Educational Philosophy of Tagore) | - प्रो. देवीप्रसाद द्विवेदी | 17–25 |
| 5. | शेषे षष्ठी | - प्रो. भारत भूषण त्रिपाठी | 26–32 |
| 6. | व्याकरणशास्त्रे महावैयाकरणभर्तृहरेः अवदानम् | - प्रो. धनीन्द्रकुमारझाः | 33–45 |
| 7. | आधुनिकतायाम् अर्थशास्त्रस्य संस्कृतस्य च परस्परसम्बन्धः | - डॉ. सुरेशप्रकाशसिंहः | 46–57 |
| 8. | संस्कृतमहाकाव्येषु रघुवंशमहाकाव्यम् | - डॉ. रामबहादुर दुबे | 58–63 |
| 9. | विविधशास्त्राभिमतसम्प्रदानविभक्त्यर्थविचारः | - वाचस्पतिः दिव्यचेतनब्रह्मचारी | 64–79 |
| 10. | महाभाष्यदृष्ट्या वनसम्पत्तिविमर्शः | - डॉ. सुधाकरमिश्रः | 80–87 |
| 11. | फलतावच्छेदकसम्बन्धविचारः | - डॉ. नीरजकुमारभार्गवः | 88–95 |
| 12. | वेदान्तदर्शने वर्णित-ब्रह्मणः जैनदर्शने वर्णित-परमात्मनश्च विचारः | - डॉ. राका जैन | 96–106 |
| 13. | 'अकथितं किञ्चित्' इत्युपन्यासस्य वैशिष्ट्यम् | - डॉ. रामकुमारी | 107–113 |
| 14. | व्याकरणमीमांसाशास्त्रयोः सम्बन्धः | - डॉ. गोविन्दपौडेलः | 114–116 |
| 15. | शिक्षकप्रशिक्षणार्थिनां व्यक्तित्वविकासे भारतीयदर्शनशास्त्रस्य प्रभावः | - डॉ. रुद्रनारायणनरसिंहमिश्रः | 117–122 |
| 16. | साहित्यवाङ्मये समाजस्य नवनिर्माणे नैतिकशिक्षाया योगदानम् | - डॉ. सुमेरीलालः | 123–131 |
| 17. | आचार्यमोक्षाकरगुप्तविरचितबौद्धतर्कभाषानुसारं षोडशप्रकारिका अनुपलब्धिः | - डॉ. अतुलकुमारश्रीवास्तवः | 132–137 |

# विविधशास्त्राभिमतसम्प्रदानविभक्त्यर्थविचारः

– वाचस्पतिः दिव्यचेतनब्रह्मचारी
व्याकरणविभागः सं.सं.वि.वि., वाराणसी

कणादं पाणिनीयं च सर्वशास्त्रोपकारकम्–इतिरीतिमादाय तत्रादौ कणादमुनिमार्गगाणां मतमुस्थापयामि–

तथा हि–

## जगदीशाभिमतसम्प्रदानचतुर्थ्यर्थविमर्शः–

आचार्यस्य जगदीशस्य मते सम्प्रदाने समागतचतुर्थीविभक्तेः सम्प्रदानत्वमर्थो वर्तते। यतोहि–सम्प्रदाने चतुर्थीविधायकं सूत्रं वर्तते चतुर्थी सम्प्रदाने इति। अत्र च सूत्रे सम्प्रदाने, इत्यत्र भावप्रधाननिर्देशो वर्तते लाघवात। तथा च सूत्रस्यार्थो भवति–सम्प्रदानत्वे चतुर्थी विभक्तिः भवति। तस्मादुक्तप्रामाण्यात् सिध्यति सम्प्रदानत्वं चतुर्थीविभक्तेरर्थः। सम्प्रदानत्वं च किमिति जिज्ञासायामाह–

**गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विग्रहस्थया।**
**यः स्वार्थो बोधनीयस्तत् सम्प्रदानत्वमीरितम्[1]॥**

अन्वयः–विग्रहस्थया चतुर्थ्या गत्यादिभिन्ने धात्वर्थे यः स्वार्थो बोधनीयः तत् सम्प्रदानत्वम् ईरितम्।

कारिकार्थं प्राह जगदीशः–"गत्यादिभिन्ने यद्धातूपस्थाप्ये यादृशार्थे विग्रहस्थचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्यतादृशक्रियायां सम्प्रदानत्वमुच्यते"[2]। अर्थात् यस्मात् धातोः उपस्थाप्ये गत्यादिभिन्ने यादृशे अर्थे विग्रहस्थचतुर्थ्या यः स्वकीयः अर्थः अनुभाव्यते सः चतुर्थ्यर्थ एव तस्मात् धातोः उपस्थाप्ये तादृशे क्रियारूपे अर्थे सम्प्रदानत्वं कारकम् इत्युच्यते। यथा ब्राह्मणाय वशिष्ठाय दानं धनस्य इत्यत्र चतुर्थ्यर्थः प्रतियोगित्वं अर्थः तत्र

प्रतियोगित्वे ब्राह्मणस्य वशिष्ठस्य निष्ठत्वसम्बन्धेनान्वयो भवति। ददातेर्थः स्वत्त्वजनकत्यागः, तत्र स्वत्त्वे प्रतियोगित्वस्य आश्रयत्वसम्बन्धेनान्वयो भवति, तत्रैव स्वत्त्वे धनस्य षष्ठ्यर्थवृत्तित्वसम्बन्धेनान्वयो भवति, तथा चोक्तवाक्यस्य ब्राह्मणाभिन्नवशिष्ठप्रतियोगिकध नवृत्ति-स्वत्त्वजनकत्यागः, इत्यर्थो जायते, अत्र ब्राह्मणपदोत्तरचतुर्थ्या गत्यादिभिन्ने दाधात्वर्थे स्वत्वे प्रतियोगित्वं बोध्यते, तस्मात् तदेव प्रतियोगित्वमत्र सम्प्रदानत्वमिति भावः। अथवा ब्राह्मणपदोत्तरचतुर्थ्या निरूपितत्वमर्थः। तदा चोक्तवाक्यस्यार्थो भवति ब्राह्मणनिरूपितध नवृत्तिस्वत्त्वजनकत्यागः, इति, तदा निरूपितत्वं सम्प्रदानमिति भावः। तथा चोक्तं जगदीशेन-''ब्राह्मणाय दानं धनस्येत्यादौ ददातेः स्वत्त्वजनकः त्यागोऽर्थस्तन्निविष्टे च स्वत्त्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र सम्प्रदानत्वम्, ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यद्धनवृत्ति स्वत्त्वं तज्जनकस्त्याग इत्येवं तत्र प्रत्ययात्''[3]।

अत्र शाब्दबोधः।

राजा विप्राय धनं ददाति। इत्यत्र ददातेः स्वत्वजनकत्यागो वाच्यः। विप्रपदोत्तरचतुर्थीविभक्तेरर्थः प्रतियगित्वं निरूपितत्वं चतुर्थ्यर्थः। तिबर्थः कृतिः। तत्र चतुर्थीविभक्तयन्तार्थस्य विप्रप्रतियोगित्वस्य धात्वर्थे स्वत्वे अन्वयः। तत्रैव च द्वितीयान्तार्थस्य धनवृत्तित्वस्यान्वयः। त्यागस्य च तिबर्थकृतौ अन्वयः। कृतेश्च प्रथमान्तार्थे राज्ञि आश्रयत्वसम्बन्धेनान्वयः। ततश्चोक्तवाक्यात् विप्रप्रतियोगिकध नवृत्ति- स्वत्वजनकत्यागानुकूल-कृतिमान् राजा यदा च निरूपितत्वं चतुर्थीविभक्तेरर्थ इति पक्षस्तदा विप्रनिरूपितधनवृत्तिस्वत्व-जनकत्यागानुकूलकृतिमान् राजा।

अथ गदाधराभिमतसम्प्रदानस्वरूपविमर्शः-सम्प्रदानचतुर्थ्यर्थविमर्शश्च।

गदाधरेण व्युत्पत्तिवादे स्वाभिमतं सम्प्रदानस्य स्वरूपं प्रतिपादितम्। तत्र हि वदति सः-''सम्प्रदानत्वं च मुख्यभाक्तसाधारणं क्रियाकर्मसम्बन्धितया कर्त्रभिप्रेतत्वम्''[4]। अर्थात् क्रियाया यत्कर्म तत्सम्बन्धिरूपेण यत्कर्तुः अभिप्रेतं वर्तते तदेव सम्प्रदानं भवति। अत्र क्रियाकर्मत्वं नाम क्रियाजन्यफलाश्रयत्वम्, तद्वच्च क्रियाकर्म तस्य सम्बन्धश्चात्र कर्मनिष्ठफलभागित्वरूपं विवक्षितं वर्तते, कर्तुरभिप्रेतत्वं नाम कर्तुरिच्छाविषयत्वम्। तथा च क्रियाजन्यं यत्फलं तद्भागित्वेन यो हि कर्तुः इच्छाविषयः तत्सम्प्रदानमिति सिध्यति। तथा चोक्तमपि गदाधरेण-''क्रियाकर्मत्वं च क्रियाजन्यफलशालित्वम्। तद्वता सम्बन्धश्च

तन्निष्ठफलभागित्वमेव। तथा च क्रियाजन्यफलभागितया कर्तुरिच्छाविषयत्वं पर्यवसन्नम्''[5]। इदं च लक्षणं भगवतः पाणिने सम्मतमपि भगवान् पाणिनिः सम्प्रदानसंज्ञाविधायकं सूत्रं कृतवान् ॅकर्मणा यमभिप्रैति स सम्प्रदानम्'' इति, अत्र यमभिप्रैति, इत्यस्य यम् अभिसम्बद्धुम् इच्छति इत्यर्थः, तथा च सूत्रस्यार्थो भवति, कर्ता कर्मणा सह यम् अभिसम्बद्धुम् इच्छति तत्सम्प्रदानसंज्ञं भवतीति। चाह गादाधरः-ॅकर्मणा यमभिप्रैतीत्यस्य कर्मणा यमभिसम्बद्धुमिच्छतीति शाब्दिकैर्विवरणाद् उक्तस्थले त्यागरूपक्रियजन्यगोनिष्ठ-स्वत्वभागितया दातुरिच्छाविषयो ब्राह्मण इति तस्य सम्प्रदानत्वम्''[6]।

अथ यदि सम्प्रदानस्य निरुक्तं लक्षणं स्वीक्रियते चेत् कर्मसम्प्रदानयोरविशेषापत्तिः। भेदः उच्यते-फलाश्रयतयेष्टत्वं कर्मत्वम्, यथा चौत्रः ग्रामं गच्छतीत्यादौ गमनजन्यसंयोग-रूपफलाश्रयतया ग्रामस्येष्टत्वात् तस्य कर्मत्वम्। फलसम्बन्धितयेष्टत्वं सम्प्रदानत्वम्, यथा राजा विप्राय गां ददातीत्यादौ दानरूपक्रियाजन्यं यद् गोनिष्ठं स्वत्वं फलं तत्सम्बन्धितया तादृशस्वत्वनिरूपकतया विप्रस्य कर्तुरिष्टत्वात् तस्य सम्प्रदानत्वमिति भावः। एवं च धात्वर्थतावच्छेदकफलाश्रयतया इच्छाविषयत्वं कर्मत्वम्। धात्वर्थतावच्छेदक-फलसम्बन्धितया इच्छाविषयत्वं सम्प्रदानत्वम्, इति फलितम्, तथा च न पर्यायत्वमिति भावः। तथा चोक्तं गदाधरेण-''मैवम्। फलाश्रयतयेष्टत्वमेव हि कर्मत्वम्। फलसम्बन्धितयेष्टत्वं सम्प्रदानत्वम्। ब्राह्मणादिश्च न त्यागजन्यस्व्त्वाश्रयतया दातुष्टिः, अपितु तन्निरूपकतयैव, अतो न तस्य कर्मता''[7]।

अथ पत्ये शेते, इत्यत्र शीङ्धातोः अकर्मकत्वात् धात्वर्थतावच्छेदकफलाप्रसिद्धया तद्घटितसम्प्रदानत्वं कथं पत्युः स्यादिति चेदुच्यते-धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नो यः फलसम्बन्धः तद्वत्तया इच्छाविषयत्वं सम्प्रदानत्वमित्यत्र भेदप्रतियोगिप्रविष्टे धात्वर्थतावच्छेदके फलत्वं न निवेश्यते। तथा च धात्वर्थतावच्छेदकनिरूपिताश्रयत्वभिन्नो यः फलसम्बन्धः तत्प्रकारकेच्छाविषयत्वं सम्प्रदानत्वम्। पत्ये शेते इत्यत्र धात्वर्थतावच्छेदकं शयनत्वं तन्निरूपिताश्रयत्वभिन्नः यः फलसम्बन्धः शयनजन्यप्रीत्यादि-सम्बन्धा तद्वत्त्वेनेच्छाविषयत्वात् पत्युः सम्प्रदानत्वोपपत्तिः। ब्राह्मणाय गां ददातीत्यादौ तु धात्वर्थतावच्छेदकं स्वत्वं तदाश्रयताभिन्नः सम्बन्धः स्वत्वनिरूपकत्वं तत्प्रकारकेच्छाविषयत्वात् ब्राह्मणस्य सम्प्रदानत्वम्।

अथ गदाधराभिमतसम्प्रदानचतुर्थ्यर्थविमर्शः

चरित्रः ब्राह्मणाय गां ददाति इत्यादौ निरूपितत्वप्रकारकेच्छाविषयत्वं चतुर्थ्यर्थः। एवं च प्रकृतवाक्ये दाधात्वर्थः स्वत्वजनकत्यागः, गामिति द्वितीयान्तस्य गोवृत्तित्वमर्थः। तस्य च स्वत्वे अन्वयः। निरूपितत्वप्रकारकेच्छाविषयत्वरूपचतुर्थ्यर्थघटके निरूपितत्वे प्रकृत्यर्थस्य ब्राह्मणस्य निष्ठत्व-सम्बन्धेनान्वयः, चतुर्थ्यर्थस्य च स्वत्वे अन्वयः। तथा चोक्तवाक्यात् ब्राह्मणनिष्ठ-निरूपितत्वप्रकारकेच्छा- वषयभूतं गोनिष्ठं यत्स्वत्वं तज्जनको यो हि त्यागः तदनुकूलकृतिमान् चरित्रः इति बोधः। ब्राह्मणनिष्ठनिरूपितत्वप्रकारिका चेच्छा ब्राह्मणनिरूपितं गोनिष्ठं स्वत्वं भवतु इत्याकारा। तथा चाह गदाधरः-''एवं च ब्राह्मणाय गां ददातीत्यादौ ब्राह्मणनिरूपितत्वेन स्वेच्छाविषयगोनिष्ठस्वत्वजनकत्यागकर्तेति बोधः। निरूपितत्वेन कर्तुरिच्छाविषयत्वं द्वितीयान्तार्थ-गोवृत्तित्वान्वयि-धात्वर्थतावच्छेदकस्वत्वान्वयि- चतुर्थ्यर्थः। स्वत्वजनकत्यागश्च ददात्यर्थः''[18]।

पत्नी पत्ये शेते। पतिनिष्ठत्वप्रकारकस्वेच्छाविशेष्यप्रीतिजनकशयनानुकूलकृतिमती भार्या।

नारदाय रोचते कलहः। इत्यत्र रुचिधातोः प्रीतिजनकत्वमर्थः। चतुर्थीविभक्तेः वृत्तित्वमर्थः। आख्यातार्थः आश्रयत्वम्। तत्र चतुर्थ्यर्थे नारदायस्यान्वयः। चतुर्थीविभक्तेरर्थस्य वृत्तित्वस्य धात्वर्थैकदेशे प्रीतौ अन्वयः। प्रीतिजनकत्वस्य च आख्यातार्थे आश्रयत्वे अन्वयः। आश्रयत्वस्य च प्रथमान्तार्थे कलहे अन्वयः। ततश्चोक्तवाक्यात् नारदवृत्तिप्रीतिजनकताश्रयः कलहः, इति बोधो भवति।

चैत्र पुष्पेभ्यः स्पृहयति। पुष्पपदोत्तरचतुर्थीविभक्तेरर्थो विषयित्वम्। तत्र पुष्पस्य निरूपितत्व-सम्बन्धेनान्वयः। स्पृहिधातोः इच्छार्थः, तत्र विषयित्वस्याश्रयत्व-सम्बन्धेनान्वयः। इच्छायाश्च प्रथमान्तार्थे आश्रयत्वसम्बन्धेनान्वयः। ततश्चोक्तवाक्यात् पुष्पनिरूपितविषयित्वाश्रयेच्छाश्रयः चैत्रः इति बोधः। पुष्पविषयकेच्छावांश्चैत्र इति यावात्। एवं पिता पुत्राय क्रुद्धयति, इति वाक्यस्य पुत्रनिरूपितविषयित्वाश्रय- क्रोधवान् पिंता, इत्याकरकबोधो भवति।

## अथ गागाभट्टाभिमतसम्प्रदानचतुर्थ्यर्थविमर्शः-

मीमांसकमते चतुर्थी सम्प्रदाने इति पाणिनिसूत्रप्रामाण्यात् सम्प्रदानं चतुर्थीविभक्तयर्थः। तत्र गागाभट्टेन भाट्टचिन्तामणिग्रन्थे प्राचीनमीमांसकानां मतं नवीनमीमांसकाना मतं च प्रतिपादितम्। तत्र प्राचीनमतं प्राह गागाभट्टः-''सम्प्रदानं चतुर्थ्यर्थः। चतुर्थी सम्प्रदाने चतुर्थी

इति सूत्रात्''[९]। तत्र सम्प्रदानत्वं किमिति जिज्ञासां प्राह गागाभट्टः-''सम्प्रदानत्वं च धात्वर्थकर्मणा व्याप्यमानत्वम्। व्याप्यमानत्वमभिप्रेयमाणत्वम्। धात्वर्थकर्मजन्यव्यापारोद्देश्यत्वमिति यावत्''[10]। एवं च गागाभट्टानुसारं प्राचीनमते धात्वर्थकर्मजन्यव्यापारोद्देश्यत्वं सम्प्रदानत्वमिति लक्षणं प्रतिफलति। यथा राजा विप्राय गां ददाति, इत्यत्र धातुः ददातिः तदर्थः, परस्वत्वरूपफलम्, तत्कर्म गौः तज्जन्यः पयोदोहनादिव्यापारः तदुद्देश्यत्वं विप्रस्यास्तीति भवति विप्रस्य सम्प्रदानत्वमिति भावः। तथा च तस्य सम्प्रदानत्वं सिध्यति, ततश्च सिद्धयति चतुर्थीविभक्तिः। तथा चाह गागाभट्टः-''यथा विप्राय गां ददाति दानकर्मीभूतगोजन्यपयोदोहनादिव्यापारोद्देश्यत्वाद्विप्रयस्य सम्प्रदानत्वम्''[11]।

सम्प्रदानविषये नवीनमतं प्रतिपादयिुमाह गागाभट्टः-अभिनवास्तु ''दृष्टद्वारकधात्वर्थोद्देश्यत्वं सम्प्रदानत्वम्। धात्वर्थजन्यदृष्टफलशालित्वमिति यावत्''[12]। तत्फलं सकर्मकेषु धात्वर्थतावच्छेदकम्, अकर्मकेषु धात्वर्थजन्यम्। सूत्रस्थकर्मणेति पदस्य धात्वर्थेनेत्यर्थः। तेन विप्राय गां ददाति, पत्ये शेते, इत्यादिषु विप्रनिष्ठस्वत्वोत्पत्त्याद्युद्देश्यको दानानुकूलो व्यापारः, पतिनिष्ठसुवोद्देश्यकशयनानुकूलो व्यापार इति बोध इति मुख्यमेव सम्प्रदानत्वम्। दृष्टद्वारकधात्वर्थोद्देश्यत्वादेव कर्मकारकापेक्षया सम्प्रदानस्य प्राधान्यम्। अत एव मैत्रावरूणाय दण्डं प्रयच्छति इत्यत्र दण्डदानस्य चतुर्थीश्रुत्या दृष्टार्थत्वं सिद्धान्तितम् इति वदन्ति।

## अथ खण्डदेवाभिमतसम्प्रदानचतुर्थ्यर्थविमर्शः-

**खण्डदेवः**-भाट्टतन्त्ररहस्ये स्वमतं प्रतिपादयितुमाह-''विप्राय गां ददातीति वाक्यात् विप्रसम्प्रदानकं गोकर्मकं दानमिति बोधोदयाद् देयद्रव्यनिष्ठस्वत्वनिरूपकत्वरूपम्, तत्समनियतमव-खण्डोपाधिरूपमेव वा सम्प्रदानत्वं युक्तमाश्रयितुम्। तदेव च शाक्तश्चतुर्थ्यर्थः''[13]। अयं भावः-खण्डदेवेन सम्प्रदानस्य द्विधा प्रतिपादनं कृतमेकं सवण्डरूपेण अपरञ्चावण्डरूपेण। तत्र सखण्डसम्प्रदानस्य लक्षणं प्रोक्तम्-देयद्रव्यनिष्ठस्वत्वनिरूपकत्वं सम्प्रदानत्वम् इति। यथा विप्राय गां ददाति इत्यत्र देयद्रव्यं गौः तन्निष्ठं यत्स्वत्वं तन्निरूपकत्वं विप्रे वर्तते, अतस्तस्य सम्प्रदानत्वमिति भावः। परन्तु एवं सम्प्रदानस्य सवण्डत्वे स्वीकृते सति गौरवं स्यादिति कृत्वा तस्य अवण्डस्वरूपमाह-तत्समनियतमवण्डोपाधिरूपमेव वा सम्प्रदानत्वमिति। अर्थात् देयद्रव्यनिष्ठस्वत्वनिरूपक-त्वसमनियतः कश्चिच् घटत्वादिवद्

अवण्ड: धर्म एव सम्प्रदानत्वमिति भाव:। तदेव सम्प्रदानत्वं च सम्प्रदानचुर्थीविभक्तेरर्थ:। खण्डदेवस्तु सर्वत्र मुख्यसम्प्रदानतां नाङ्गीककरोति। वृक्षादीनां भाक्तमेव सम्प्रदानत्वमिति तस्याशय:। विप्राय गां ददाति इति वाक्यात् विप्रसम्प्रदानकं गोकर्मकं दानम् इत्येव शाब्द-बोधोदयात्। वण्डोपाधिस्वीकारे पदार्थैकदेशफले प्रकृत्यर्थान्वयादिदोषापत्ते:। तादृशचतुर्थ्यर्थ-सम्प्रदानत्वे प्रकृत्यर्थस्याधेयत्वेनान्वय:।

## श्रीभट्टोजिदीक्षितकौण्डभट्टाभिमतसम्प्रदानचतुर्थ्यर्थविमर्श:-

सम्प्रदाने चतुर्थी (2-3-18) इति सूत्रेण विधीयमाना या चतुर्थी सा सम्प्रदानचतुर्थी इत्युच्यते। तस्य च सूत्रस्यार्थो भवति सम्प्रदाने चतुर्थी भवति, अतस्तस्या: सम्प्रदानचतुर्थ्या: सम्प्रदानमर्थो भवति। सम्प्रदानत्वं नाम उद्देश्यत्वमत: सम्प्रदानचुर्थ्या: भट्टोजिदीक्षितमते कौण्डभट्टमते च उद्देश्यत्वमर्थो भवति। तथा च वदति भट्टोजिदीक्षित:-''आश्रयोऽवधि रुद्देश्य: सम्बन्ध: शक्तरेव वा। यथायथं विभक्तयर्थ: सुपां कर्मेति भाष्यत:''[14]। तट्टीकाकारश्च चाह कौण्डभट्ट:-''उद्देश्यश्चतुर्थ्यर्थ:''[15]। अत्र कौण्डभट्टवचने चतुर्थीपदेन सम्प्रदानचतुर्थी एव ग्राह्या। अथ सम्प्रदाने चतुर्थीति सूत्रेण सम्प्रदाने चतुर्थी भवतीति कृत्वा तस्या अर्थ: सम्प्रदानमित्येव वक्तव्यमासीत्। तर्हि कथं प्रोक्तमुद्देश्यत्वं चतुर्थ्यर्थ इति तु नैव वक्तव्यं कारणं हि सम्प्रदानं नाम उद्देश्यत्वमेव भवतीति तत्तद्ग्रन्थेषु सम्प्रदानस्वरूपविचारेण प्रतीयते। अतोऽत्र सम्प्रदानस्वरूपं प्रतिपाद्यते। तथाहि-

## भट्टोजिदीक्षिताभिमतसम्प्रदानस्वरूपविमर्श:-

भट्टोजिदीक्षित: सिद्धान्तकौमुद्यां वदति ''कर्मणा यमभिप्रैति स सम्प्रदानम् (पा.सू. 1-4-32) इति सूत्रवृत्तौ ''दानस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञ: स्यात्''। अत्र दानस्य इत्यत्यनेन क्रियामात्रस्य इत्यर्थो विवक्षित:। क्रियामात्रस्य कर्मणा यमभिप्रैति स सम्प्रदानसंज्ञ: स्यात यथा विप्राय गां ददातीत्यादौ क्रिया दानरूपा तत्कर्म गौ: तेन साकं सम्बन्धाय कर्ता विप्रम् अभिप्रैति अत: तत्सम्प्रदानसंज्ञो भवतीति भाव:। परन्तु एवं सति आजां ग्रामं नयति इत्यादौ अतिप्रसङ्गो वर्तते, तन्निराकरणाय भट्टोजिदीक्षितो वदति ''यमभिप्रैतीत्युक्तया हि यमिति निर्दिष्टस्य शेषित्वं कर्मणश्च शेषत्वं लभ्यते''[16]। इति। एवं च यो हि शेषी भवति तस्यैव सम्प्रदानसंज्ञा भवति। शेषी इत्यस्य च उद्देश्य: इत्यर्थ:।

## अथ कौण्डभट्टाभिमतसम्प्रदानस्वरूपविमर्शः-

सम्प्रदानस्वरूपं प्रतिपादयितुमाह कौण्डभट्टः-"कर्मणा यमभिप्रैति स सम्प्रदानम् इ- सूत्रात् कर्मणा करणभूतेन यमभिप्रैति ईप्सति तत् कारकं सम्प्रदानम् इति"[17]।

अयं भावः-कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रे कर्मणेति तृतीयार्थः करणत्वम् तच्चात्र प्रतियोगित्वरूपम्, अभिप्रैति इत्यस्य सम्बन्धुम् इच्छतीत्यर्थः, तथा च दानकर्म-प्रतियोगिकसम्बन्धनिष्ठप्रकारतानिरूपिका या दातृनिष्ठा इच्छा तन्निरूपितविशेष्यताश्रयः इति सूत्रार्थः। विशेष्यतायाश्च प्रकारतानिरूपिताया एव ग्रहणात् तादृशप्रकारतानिरूपितदातृ- निष्ठेच्छीयविशेष्यताश्रयः सम्प्रदानमिति यावत्। तादृशीच्छा च विप्रो गोस्वामी भवतु, इत्याकार तदीयविशेष्यताश्रयत्वात् विप्राय गां ददाति, इत्यादौ विप्रः सम्प्रदानम्।

अथवा-कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रे अभिप्रैतीतिशब्दः-सम्बन्ध -प्रकारकेच्छावाचकः, अभिप्रैति-ईप्सति, सम्बन्धुमिच्छति, इत्यर्थात्। कर्मणेति सहयुक्ततृतीयार्थः प्रतियोगित्वम्, यमिति कर्मद्वितीयार्थो विशेष्यतात्मकविषयताश्रयः, अभिप्रैतीत्यनेन च अभिप्रैतिकर्तुराक्षेपः। तथा च कर्मप्रतियोगिकसम्बन् -प्रकारककर्तृवृत्तीच्छानिरूपित- विशेष्यतात्मकविषयताश्रयो यः स सम्प्रदानम् इति, कर्मप्रतियोगिकसम्बन्धप्रकारिका यद्विशेष्यिकेच्छा स सम्प्रदानमिति वा सूत्रार्थः। यथा विप्राय गां ददातीत्यत्र कर्मीभूतगोप्रतियोगिक- स्वस्वामिभावसम्बन्धप्रकारिका या दानकर्तृवृत्तिः विप्रो गोप्रतियोगिकस्वस्वामिभाव-सम्बन्ध वान् भवतु इतीच्छा तद्विषयो विप्र इति स सम्प्रदानं भवतीति भावः।

अत एव वदति कौण्डभट्टः "यमभिप्रैति इत्युक्तया हि यम् इति निर्दिष्टस्य उद्देश्यत्वलक्षणं शेपित्वम्, कर्मणा इति निर्दिष्टस्य गवादेः शेषत्वं च प्रतीयते"[18]। शेषित्वं च धात्वर्थक्रियाया यत्कर्म तद्वृत्तिः यद्धात्वर्थफलं तत्सम्बन्धजन्यफलाश्रयत्व-प्रकारकेच्छाविशेष्यत्वम्। यथा विप्राय गां ददाति इत्यत्र दानकर्मीभूतगोवृत्तितादृशस्वत्व-सम्बन्धजन्यसुवाश्रयो विप्रो भवतु इत्याकारिका या इच्छा तादृशोच्छाविशेष्यत्वरूपं शेपित्वं विप्रस्य। ततश्च तस्य सम्प्रदानत्वं सिद्धयति। एवं कौण्डभट्टेन कथनेनापि सम्प्रदानं नाम शेषि, शेषि एव च उद्देश्य इति कृत्वा सिद्धमिदं यत्सम्प्रदानचतुर्थ्यर्थः उद्देश्यः।

**अत्रायं विशेष:**

कर्मणा यमभिप्रैति स सम्प्रदानम् इति पाणिनिवचनम् क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् इति हि कात्यायनवचनम्। तत्र पाणिनिसूत्रे उभयगतिरिह भवतीति परिभाषाकारणात् कर्मपदं कृत्रिमाकृत्रिमोभय-बोधक:, अर्थात् शास्त्रप्रसिद्धकर्मसंज्ञकार्थबोधक:, लोकप्रसिद्धक्रियारूपकर्मार्थ-बोधकश्च। लोके हि कर्मपदेन क्रिया गृह्यते, यथा त्वं किं कर्म करोषीत्यस्य त्वं कां क्रियां करोषीत्यर्थ:। एवं च सूत्रे उभयार्थकस्य कर्मपदस्य ग्रहणात् वार्तिकं गतार्थमिति दिक्। दृश्यते हि अनेकत्र लोकप्रसिद्धक्रियार्थबोधककर्मपदस्य शास्त्रे ग्रहणम्। यथा कर्त्तरि कर्मव्यतिहारे कर्मवत्कर्मणा तुल्यक्रिय: इत्यादि। अत्र उभयगतिरिह भवतीत्यनेनेष्टसिद्धि:। उभयगति: उभयार्थावगति:। अत्र प्रमाणम्-द्वित्रिभ्यां तयस्यायज्वा इति। अन्यथा संख्याया अवयवे तयप् इत्यत्र शास्त्रीयसङ्ख्याया एव ग्रहणे द्वित्रिशब्दाभ्यां तदप्राप्त्या तस्यायज्विधिवैयर्थ्यं स्यादिति दिक्। एवं च सूत्रेणैवोभयत्रेष्टसिद्धि:, तस्मात्पृथग्वचनं नैव कर्तव्यम्।

नागेशभट्टेनापि वृत्तिकारमतं पूर्वपक्षरूपेणोपन्यस्तम्-"यत्तु वृत्तिकारा:-सम्यक् प्रदीयते यस्मै तत्सम्प्रदानमित्यन्वर्थसंज्ञेयम्। तथा च गोनिष्ठस्वस्वत्वनिवृत्तिसमानाधिकरणपरस्वत्वोत्पत्त्यनुकूल- व्यापाररूपक्रियोद्देश्यस्य ब्राह्मणादेरेव सम्प्रदानत्वमिति"[19]।

कौण्डभट्टेनापि वृत्तिकारमतमेवमेव प्रोक्तम्-"वृत्तिकारास्तु सम्यक्प्रदीयते यस्मै तत्सम्प्रदानम् इत्यन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं वर्णयन्तो रजकस्य वस्त्रमित्याहु:"[20]।

**सम्प्रदानभेदा:-**

सम्प्रदानं च त्रिविधम्-अनिराकर्तृसम्प्रदानम्-प्रेरयितृसम्प्रदानम्-अनुमन्तृसम्प्रदानम्, चेति। अत एवोक्तं हरिणा वाक्यपदीये-

**अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।**
**प्रेरणानुमतिभ्यां च लभते सम्प्रदानताम्[21]॥**

**अस्यार्थ:**-त्यागाङ्गं सत् यत्कर्मणा सम्बन्धुम् अभिप्रेयमाणं तत्कारकम् कर्तुरनिराकरणात्, तथा च कर्तु: प्रेरणया, कर्तुरनुमतिप्रदानेन च सम्प्रदानतां लभते, इत्यर्थ।

**अनिराकर्तृसम्प्रदानम्**-प्रवृत्तिनिवृत्त्यनुकूलव्यापारशून्यत्वम् अनिराकर्तृ-सम्प्रदानत्वम्। यथा-सूर्याय अर्घ ददाति। अत्र सूर्यः दीयमानमर्घं न निराकरोति, न वा तद्दातारं निराकरोति, नापि प्रेरयति, अतोऽत्र प्रवृत्तिनिवृत्त्यनुकूलव्यापारशून्यत्वात् सूर्यः अनिराकर्तृसम्प्रदानम्।

**प्रेरयितृसम्प्रदानम्**-प्रकृतधात्वर्थकर्मजन्यफलभागितयेच्छाविषयत्वे सति कर्तृ-सम्बन्धि-त्यागादिविषयकेष्टसाधनताबोधौपयिकव्यापारवत्त्वं प्रेरयितृसम्प्रदानत्वम्। यथा विप्राय गां ददाति नृपः। अत्र दाधात्वर्थगोरूपकर्मजन्यफलभागितया इच्छाविषयो विप्रः, किञ्च विप्रे नृपरूपकर्तृवृत्तित्यागादिविषय- केष्टसाधनता तद्बोधोपयिकव्यापारवत्त्वमपि विप्रे। अतोऽत्र विप्रः प्रेरयितृसम्प्रदानम्।

**अनुमन्तृसम्प्रदानम्**-यथा उपाध्याय गां ददाति। अत्र हि उपाध्यायो न शिष्यं गोदाने प्रवर्तयति न वा निवर्तयति न वा निषेधति, किन्तु तुभ्यं मया गौर्दीयते गृहाण, इत्युक्तः देहि इत्यनुमन्यते। अतोऽत्र अनुमन्तृसम्प्रदानम्।

## अत्रायं विशेषः

भट्टोजीदीक्षितेन यद्यपि सम्प्रदानचतुर्थीविभक्तेरर्थ उद्देश्य इति प्रोक्तम्। किन्तु नह्येकं सूत्रं सम्प्रदानसंज्ञाविधायकं किन्तु नाना सूत्राणि सन्ति। तत्र कर्मणा यमभिप्रैति स सम्प्रदानम् (2-3-18) इति सूत्रविहितसम्प्रदानसंज्ञकात् विहितचतुर्थीविभक्तेस्तु उद्देश्य अर्थो वर्तते। एवं चास्योदाहरणस्य विप्राय ददातीत्यस्य विप्रोद्देश्यकं दानम् इति बोधः। रुच्यर्थानां प्रीयमाणः (2-3-18) इदमपि सम्प्रदानसंज्ञाविधायकं सूत्रं वर्तते। एतत्सूत्रविहितसम्प्रदानसंज्ञकात् विधीयमानचतुर्थीविभक्तेः नहि उद्देश्यो वाच्यः किन्तु आश्रयरूपसम्बन्धो वाच्यः, कारणं ह्येतत्सूत्रं शेषे षष्ठी (2-3-18) इति सूत्रस्यापवादभूतं वर्तते, ततश्च उत्सर्गसमानदेशाः अपवादाः इति न्यायेन तस्याः सम्बन्धार्थकत्वौचित्यात्। एवं चौतदोदाहरणस्य हरये रोचते भक्तिः इत्यस्य हरिसम्बन्धिभक्तिविषया या प्रीतिः तदनुकूलो भक्तिकर्तृको व्यापारः, इति बोधः। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः (2-3-18) इदं सूत्रं कर्तुरीप्सिततमं कर्म (2-3-18) इति सूत्रस्यापवादभूतं वर्तते, ततश्चौतत्सूत्रविहितसम्प्रदासंज्ञकात् विधीयमानचतुर्थीविभक्तेः कर्म वाच्यः। ततश्च गोपी स्मरात् कृष्णाय श्लाघते इत्यस्य गोपीकर्तृका स्मरहेतुका कृष्णकर्मकबोधफलिका स्तुतिः, इति बोधः। धारेरुत्तमर्णः (2-3-18) इदं सूत्रं शेषे षष्ठीति सूत्रस्यापवादभूतं वर्तते तस्मादेतत्सूत्रविहितसम्प्रदानसंज्ञकात् विधीयमानचतुर्थीविभक्तेः

सम्बन्धो वाच्यः। एवं च भक्ताय मोक्षं हरिः धारयति इत्यस्य भक्तसम्बन्धि मोक्षकर्मकवस्थित्यनुकूलो व्यापारः, इति बोधः। स्पृहेरीप्सितः (2-3-18) इदमपि सूत्रं शेषे षष्ठीति सूत्रस्यापवादभूतं वर्तते, ततश्चौतत्सूत्रविहितसम्प्रदानसंज्ञकात् विधीयमानचतुर्थीविभक्तेरर्थः सम्बन्धः। एवं च पुष्पेभ्यः स्पृहयति, इत्यस्य पुष्पसम्बन्धीच्छा। क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः (2-3-18) तत्र क्रुधद्रुह, इत्येतौ धातू अकर्मकौ तस्मादेतयोः प्रयोगे शेषे षष्ठीति सूत्रस्यापवादभूतमिदं सूत्रमिति कृत्वा हरये क्रुध्यति, हरये द्रुह्यति, इत्यादौ चतुर्थ्यर्थः सम्बन्धः। ततश्च हरये क्रुध्यति इत्यस्य हरिसम्बन्धी क्रोधः। हरये द्रुह्यति, इत्यस्य हरिसम्बन्धी द्रोहः। ईर्ष्य असूया इत्यनयोः योगे कर्मसंज्ञाप्राप्ता वर्तते, अतस्तयोर्योगे कर्तुरीप्सिततमं कर्म (2-3-18) इति सूत्रस्यापवादभूतमिदं सूत्रं तस्माद् हरये ईर्ष्यति, हरये असूयति, इत्यादौ कर्म चतुर्थ्यर्थः। एवं च हरये ईर्ष्यति इत्यस्य हरिकर्मकोत्कर्षविषयो द्वेषः। हरये असूयति इत्यस्य हरिकर्मकगुणविषयकदोषाविष्करणम्। राधीक्ष्योर्यस्य विप्रश्नः (2-3-18), इदमपि सूत्रं शेषे षष्ठीति सूत्रस्यापवादभूतं वर्तते, तस्मादेतत्सूत्रविहितसम्प्रदानसंज्ञकात् विधीयमानचतुर्थीविभक्तेरर्थः सम्बन्धः। प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता (2-3-18) इदं सूत्रं स्वतन्त्रः कर्ता (2-3-18) इति सूत्रस्यापवादभूतं वर्तते, तस्मादेतत्सूत्रविहितसम्प्रदानसंज्ञकात् विधीयमानचतुर्थीविभक्तेरर्थः कर्ता इति। अनुप्रतिगृणश्च (2-3-18) इदं सूत्रं कर्मसंज्ञाया अपवादभूतं तस्मादेतत्सूत्रविहितसम्प्रदानसंज्ञकात् विधीयमान-चतुर्थीविभक्तेरर्थः कर्म। प्ररिक्रयणे सम्प्रदानमन्यतरस्याम्, इदं च सूत्रं साधकतमं करणमिति सूत्रस्यापवादभूतं तस्मादेतत्सूत्रविहितसम्प्रदानसंज्ञकात् विधीयमानचतुर्थीविभक्तेः करणमर्थः।

## अथ नागेशभट्टाभिमतसम्प्रदानचतुर्थ्यर्थविमर्शः-

नागेशभट्टमते सम्प्रदानचतुर्थीविभक्तेः सम्प्रदानत्वशक्तिमान् क्रियाकारकभावः सम्बन्धश्चार्थो वर्तते। बृहच्छब्देन्दुशेखरे वदति विप्राय गां ददाति, इति वाक्यस्यार्थकरणप्रसङ्गे "दाधात्वर्थश्च स्तत्व स्वस्वत्वनिवृत्त्युभयानुकूलो व्यापारः। तदेकदेशे स्वत्वे चतुर्थ्यर्थस्योद्देश्यस्य निरूपकतयाऽन्वयः। एवं च विप्रोद्देश्यकगोनिष्ठस्वस्वस्वस्वत्व-निवृत्युभयानुकूलो व्यापार इति बोधः। उद्देश्यश्चतुर्थ्यर्थः। उद्देश्यत्वं चावण्डोपाधिः"[22]। अत एव स लघुशब्देन्दुशेखरे वदति-"सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यः। स एवोद्देश्य इत्युच्यते, क्रियाकारकभावः सम्बन्धश्च तदर्थः"[23]। वैयाकरण-सिद्धान्तमञ्जूषायामपि वदति सः-श्शकारकचतुर्थ्याः

सम्प्रदानमर्थः, चतुर्थी सम्प्रदाने इति सूत्रात्''[24]। वैयाकरणसिद्धान्तलघुमञ्जूषायां एकस्मिन् स्थले वदति-"कारकचतुर्थ्याः सम्प्रदानत्वशक्तिमानर्थः''[25]। पुनः द्वितीये स्थले वदति-''क्रियाकारकभावः सम्बन्ध इति द्वितीयोक्तदिशोचितम्''[26]। परमलघुमञ्जूषायां अपि नागेशः-''सम्प्रदानचतुर्थ्य उद्देश्यः''[27]। एतत्प्रतीकमुपादाय तट्टीकाकारो वंशीधरमिश्रः वदति-''सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यः, स एवोद्देश्य इत्युच्यते, क्रियाकारकभावः सम्बन्धश्च तदर्थः''[28]। तस्मादिदं प्रतिफलति यन्नागेशमते सम्प्रदानचतुर्थीविभक्तेः सम्प्रदानत्वशक्तिमानर्थः क्रियाकारकभावः सम्बन्धश्चार्थो वर्तते, इति भावः।

## अथ सम्प्रदानस्वरूपविमर्शः-

नागेशभट्टः प्राह सम्प्रदानलक्षणं परमलघुमञ्जूषायाम्-''क्रियामात्रकर्मसम्बन्धाय क्रियायामुद्देश्यं यत् कारकं तत्त्वं तत्सम्प्रदानत्वम्''[29]। अत्र लक्षणे मात्रशब्दः साकल्यवाचकः मात्रं कात्स्न्र्येऽवधारणे चेति कोषात्। एवञ्च सकलक्रियाकर्मसम्बन्धाय क्रियायामुद्देश्यं यत् कारकं तत्वं सम्प्रदानत्वमिति लक्षणं प्रतिफलति। यथा ब्राह्मण गां ददाति इत्यत्र दानक्रियायाः कर्म गौः तस्य सम्बन्धाय दानक्रियायामुद्देश्यभूतो ब्राह्मणः तच्च कारकमपि अतस्तस्य सम्प्रदानत्वम्, सम्प्रदानत्वाच्च तत्र चतुर्थी सम्प्रदाने इति सूत्रेण चतुर्थी भवति। एवं चैत्रो मैत्राय वार्ताः कथयति, इत्यत्र कथनक्रियायाः कर्म वार्ता तस्य सम्बन्धाय कथनक्रियायामुद्देश्यभूतो मैत्रः तच्च कारकमपि अतस्तस्य सम्प्रदानत्वं सिध्यति, ततश्च तस्माच्चतुर्थी भवतीति भावः। तथा चाह नागेशः-"यथा ब्राह्मणाय गां ददातीत्यादौ दानक्रियाकर्मीभूतगोसम्बन्धाय ब्राह्मणो दानक्रियोद्देश्यः गोब्राह्मणयोः स्वस्वामिभावः सम्बन्धः। चैत्रो मैत्राय वार्ताः कथयतीत्यत्र मैत्रवार्तयोर्ज्ञेयज्ञातृभावः सम्बन्धश्च''[30]।

## अत्र वैयाकरणसिद्धान्तलघुमञ्जूषा-

वैयाकरणसिद्धान्तलघुमञ्जूषायामपि वदति नागेशभट्टः-''कारकचतुर्थ्याः सम्प्रदानत्व-शक्तिमानर्थः। सा शक्तिश्च तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेन इच्छाविषयो यस्तन्निष्ठः। कर्मणा यमभिप्रैति स सम्प्रदानमिति सूत्रात्''[31]। एवं चानेन वचनेन तत्तद्धात्वर्थकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयत्वं सम्प्रदानत्वम् इति लक्षणं प्रतिफलति।

## अत्र वैयाकरणसिद्धान्तमञ्जूषा-

वैयाकरणसिद्धान्तमञ्जूषायां सम्प्रदानलक्षणप्रतिपादनप्रसङ्गे वदति नागेशः-"कारकचतुर्थ्याः सम्प्रदानमर्थः, चतुर्थी सम्प्रदाने इति सूत्रात्। सम्प्रदानबोधकञ्च कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रम्। धात्वर्थकर्मणा सम्बन्द्धुमिच्छति सम्प्रदानमिति तदर्थः। कर्मसम्बन्धश्च कर्मनिष्ठफलनिरूपकत्वादि। एवञ्च तत्तद्धातुकर्मनिष्ठफलनिरूपकत्वादिना इच्छाविषयस्तत्तद्धातु-सम्प्रदानमिति फलितम्"[32]।

## अत्र बृहच्छब्देन्दुशेवरः-

नागेशभट्टः तत्र कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रस्यार्थकरणप्रसङ्गे वदतिश्शसम्बद्धुमिति शेषः। अभिप्रैति, इच्छतीत्यर्थः। कर्मणा सम्बन्धश्च स्वत्वादिरूपः। एवं च दाधातुकर्मसम्बन्धितयेच्छाविषयोऽर्थः। सम्प्रदानमिति फलितम्। अयमेव च उद्देश्य इत्युच्यते, शेषीति च। एवं च कर्मकारकान्वितक्रियोद्देश्यः सम्प्रदानमिति फलितम्"[33]। यथा विप्राय गां ददातीत्यत्र कर्मकारकं गौः, तदन्विता फलरूपा स्वस्वत्वध्वंससमानाधिकरणपरस्वस्वत्वोत्वोत्पत्तिरूपा क्रिया तदुद्देश्यः विप्रो वर्तते, इति कृत्वा तस्य सम्प्रदानत्वं सिध्यतीति भावः।

## अत्रायं विशेषः।

नागेशभट्टमते सम्प्रदानमात्रात् विधीयमानायः चतुर्थीविभक्तेरर्थः सम्प्रदानत्वशक्तिमानेव कारणं हि तेषां तात्पर्यं वर्तते यत्तत्तत्सम्प्रदानसंज्ञाविधायकेन शास्त्रेण स्वस्वोद्देशे सम्प्रदानशक्तिमत्त्वं बोध्यते। अतस्तदेव सम्प्रदानचतुर्थीविभक्तेरर्थ इति भावः। अत एव प्रोक्तं तैः "तत्तत्संज्ञासूत्रैस्तत्तदर्थे तत्तत्कारक-शक्तिमत्त्वबोधनात्"[34]। अत एव तत्तद्वाक्यानां शाब्दबोधं तथैव वदति सः। विप्राय ददातीत्यस्य विप्रसम्प्रदानकं दानम् इति। पत्ये शेते इत्यस्य पतिसम्प्रदानकं शयनम् इति। हरये रोचते भक्तिरित्यस्य हरिसम्प्रदानिका भक्तिकर्तृका रुचिः इति बोधः। गोपी कृष्णाय श्लाघते इत्यस्य गोपीकर्तृका स्मरहेतुका कृष्णसम्प्रदानिका अर्थात् कृष्णवृत्तिबोधविषया स्तुतिः इति बोधः। गोपीकर्तृक कृष्णसम्प्रदानिका-अर्थात्कृष्णवृत्तिबोध विषयात्मकर्मकतथावस्थानानुकूला क्रिया इति बोधः। कृष्णाय तिष्ठतीत्यस्य कृष्णसम्प्रदानकबोध

नानुकूला स्थितिः, इति बोधः। कृष्णाय शपते इत्यस्य कृष्णसम्प्रदानक-बोधानुकूल शपथकरणम् इति बोधः। भक्ताय धारयति मोक्षं हरिः इत्यस्य हरिकर्तको भक्तसम्प्रदानको मोक्षकर्मकावस्थित्यनुकूलो व्यापारः, इति बोधः। पुष्पेभ्यः स्पृहयतीत्यस्य पुष्पसम्प्रदानिकेच्छा, इति बोधः। हरये द्रुह्यतीत्यस्य हरिसम्प्रदानको द्रोहः। हरये ईर्ष्यतीत्यस्य हरिसम्प्रदानिका ईर्ष्या, इति बोधः। हरये असूयतीत्यस्य हरिसम्प्रदानिको असूया इति च बोधः। कृष्णाय राध्यति ईक्षते वा इत्यस्य कृष्णसम्प्रदानकमर्थात्कृष्णसम्बन्धिप्रश्नविषयशुभापर्यालोचनम् इति बोधः।

## अत्र शाब्दबोधः

यजमानो विप्राय गां ददाति। अत्र यजमान सु विप्र ङे गो अम् दा ति, इत्येतानि पदानि सन्ति। तिप्रत्ययस्यार्थः कर्ता, तत्र प्रथमार्थस्य राज्ञः अभेदसम्बन्धेनान्वयः। दाधात्वर्थः स्वस्वत्वनिवृत्तिसमानाधिकरणपरस्वत्त्वोत्पत्त्यनुलो व्यापारः। तत्र तिवर्थस्य कर्तुः क्रियाकारकभावसम्बन्धेन धात्वर्थे व्यापारे अन्वयः। अमर्थः कर्तत्वशक्तिमान् तत्र प्रकृत्यर्थस्य गोः अभेदसम्बन्धेनान्वयः। द्वितीयार्थस्य कर्मत्वशक्तिमतः धात्वर्थे फले अन्वयः। ङेप्रत्ययस्य सम्प्रदानत्वशक्तिमान् अर्थः, तत्र प्रकृत्यर्थस्य विप्रस्याभेद-सम्बन्धेनान्वयः, सम्प्रदानत्वशक्तिमतश्च क्रियाकारकभावसम्बन्धेनान्वयः, धात्वर्थव्यापारे एवान्वयः। ततश्च निरुक्तवाक्यात् यजमानाभिन्नकर्तुविशिष्टः गवाभिन्नकर्मत्वशक्तिमद्विशिष्ट-स्वस्वत्वनिवृत्तिसमानाधिकरणपरस्वत्त्वोत्पत्त्यनुकूलः विप्राभिन्नसम्प्रदानत्व-शक्तिमद्विशिष्टं वर्तमानकालिको व्यापारः, इति शम्।।

## सन्दर्भग्रन्थसूची-

1. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 306/प्रकाशनवर्षम्-2007/प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
2. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 306/प्रकाशनवर्षम्-2007/प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
3. सटीकशब्दशक्तिप्रकाशिकापत्रसंख्या 303/प्रकाशनवर्षम्-2007/प्रकाशकः

चौखम्बाप्रकाशनम्, वाराणसी।

4. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्य 77/प्रकाशनवर्षम्-2012/प्रकाशकः राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः।
5. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्य 77/प्रकाशनवर्षम्-2012/प्रकाशकः राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः।
6. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्य 40/प्रकाशनवर्षम्-2012/प्रकाशकः राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः।
7. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्य 80/प्रकाशनवर्षम्-2012/प्रकाशकः राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः।
8. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्य 81/प्रकाशनवर्षम्-2012/प्रकाशकः राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपतिः।
9. समयूखभाट्टचिन्तामणिपत्रसंख्या 99/प्रकाशनवर्षम्-1933/प्रकाशकः चौखम्बासंस्कृतसीरिजः, वाराणसी।
10. समयूखभाट्टचिन्तामणिपत्रसंख्या 99/प्रकाशनवर्षम्-1933/प्रकाशकः चौखम्बासंस्कृतसीरिजः, वाराणसी।
11. समयूखभाट्टचिन्तामणिपत्रसंख्या 100/प्रकाशनवर्षम्-1933/प्रकाशकः चौखम्बासंस्कृतसीरिजः, वाराणसी।
12. समयूखभाट्टचिन्तामणिपत्रसंख्या 100/प्रकाशनवर्षम्-1933/प्रकाशकः चौखम्बासंस्कृतसीरिजः, वाराणसी।
13. भाट्टतन्त्ररहस्यपत्रसंख्या 118/प्रकाशनवर्षम्-1970/प्रकाशकः संस्कृतविद्याधर्मविज्ञानसंकायः वाराणसी।
14. वैयाकरणमतोन्मज्जनकारिकसंख्या 2/पत्रसंख्या 1/प्रकाशनवर्षम्-1998/प्रकाशकः भारतीयविद्यासंस्थानम्, वाराणसी।
15. सुबोधिनीटीकायुतवैयाकरणभूषणसारपत्रसंख्या 195/प्रकाशनवर्षम्-2001/प्रकाशकः

चौखम्बासुरभारतीप्रकाशनम्, वाराणसी।

16. रत्नप्रभाटिप्पणीयुतप्रौढमनोरमापत्रसंख्या 729/प्रकाशनवर्षम्-1997/प्रकाशकः वाणीविलासप्रकाशनम्, वाराणसी।

17. सुबोधिनीटीकायुतवैयाकरणभूषणसारपत्रसंख्या 186/प्रकाशनवर्षम्-2001/प्रकाशकः चौखम्बासुरभारतीप्रकाशनम्, वाराणसी।

18. बृहद्वैयाकरणभूषणपत्रसंख्या 117/प्रकाशनवर्षम् 1985/प्रकाशक: चौखम्बामरभारती-प्रकाशनम् वाराणसी।

19. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 175/प्रकाशनवर्षम्-2006/प्रकाशकः चौखम्बाविद्याभवनम्, वाराणसी।

20. सुबोधिनीटीकायुतवैयाकरणभूषणसारपत्रसंख्या 189/प्रकाशनवर्षम्-2001/प्रकाशकः चौखम्बासुरभारतीप्रकाशनम्, वाराणसी।

21. अम्बाकर्त्रीयुतवाक्यपदीयतृतीयकाण्डद्वितीयभागपत्रसंख्या 191/प्रकाशनवर्षम्- 1997/ प्रकाशक: सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: वाराणसी।

22. बृहच्छब्देन्दुशब्देन्दुशेखरद्वितीयभागपत्रसंख्या 882/प्रकाशनवर्षम्-1998/प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

23. दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या 497/प्रकाशनवर्षम्-2007/प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।

24. वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या 172/प्रकाशनवर्षम्-1977/प्रकाशकः-सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, उत्तरप्रदेशः।

25. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1261/प्रकाशनवर्षम्-2006/प्रकाशकः- राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।

26. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1263/प्रकाशनवर्षम्-2006/प्रकाशकः- राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।

27. वंशीटीकायुतापरमलघुमञ्जूषापंत्रसंख्या 176/प्रकाशनवर्षम्-2006/प्रकाशकः-

चौखम्बाविद्याभवनम्, वाराणसी, उत्तरप्रदेश:।

28. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 176/प्रकाशनवर्षम्-2006/प्रकाशक: चौखम्बाविद्याभवनम्, वाराणसी।

29. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 173/प्रकाशनवर्षम्-2006/प्रकाशक: चौखम्बाविद्याभवनम्, वाराणसी।

30. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 174/प्रकाशनवर्षम्-2006/प्रकाशक: चौखम्बाविद्याभवनम्, वाराणसी।

31. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1261/प्रकाशनवर्षम्-2006/प्रकाशक:- राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।

32. वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या 172/प्रकाशनवर्षम्-1977/प्रकाशक: सम्पूर्णानन्द-संस्कृतविश्वविद्यालय:, वाराणसी।

33. बृहच्छब्देन्दुशब्देन्दुशेखरद्वितीयभागपत्रसंख्या 882/प्रकाशनवर्षम्-1998/प्रकाशक: सम्पूर्णानन्दसंस्कृतविश्वविद्यालय:, वाराणसी।

34. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1204/प्रकाशनवर्षम्-2006/प्रकाशक:- राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली।

